# shrI rAmanAtha-suprabhAtam

# શ્રીરામનાથ-સુપ્રભાતમ્

## Document Information

Text title : rAmanAthasuprabhAtam 1

File name : rAmanAthasuprabhAtam.itx

Category : suprabhAta, shiva

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : January 3, 2009

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીરામનાથ-સુપ્રભાતમ્

ગણેશં શારદાં શંભું દેવીં દુર્ગાં ચ રાઘવમ્ ।
રામનાથં નમસ્કૃત્ય સુપ્રભાતં કરોમ્યહમ્ ॥ ૧॥

નમસ્તે ગિરિજા-કાન્ત શરણાગત-વત્સલ ।
ઉત્તિષ્ઠ કરુણાસિન્ધો સન્ધ્યાકાલઃ પ્રવર્તતે ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગૌરીશ ઉત્તિષ્ઠ વૃષભ-ધ્વજ ।
ઉત્તિષ્ઠ પાર્વતી-નાથ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૩॥

માતઃ પુરારિ-હૃદયાંબુજ-નિત્યવાસે ભક્ત્યા મુરારિ-મુખપૂજિત-પાદયુગ્મે ।
શ્રીશંકરાશ્રિત-જનેષુ દયાર્દ્ર-ચિત્તે શ્રીરામનાથ-દયિતે તવ સુપ્રભાતમ્ ॥ ૪॥

તવ સુપ્રભાતમમરેન્દ્ર-વન્દિતે નિજ-દીન-ભક્ત-વરદાન-શોભિતે ।
હર્-ઇધાતૃ-દેવરમણીભિરર્ચિતે હ્યવ રામનાથ-દયિતે દયાયુતે ॥ ૫॥

રામાદિ-ભક્તનિચયાસ્ત્વદુપાસનાય ગંગાદિ-પુણ્યસરિદાહૃત-દિવ્યપુષ્પૈઃ ।
આગત્ય પાદયુગલાર્ચન-જાગરૂકાઃ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૬॥

વીણા-મૃદઙ્ગ-પરિમણ્ડિત-નારદાદ્યૈઃ સંગીયમાન-ચરિતામૃત પુણ્યદેહ ।
ચૂડામણીકૃત-મનોહર-ચન્દ્રબિંબ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૭॥

રામેશ્વરેતિ પ્રથિતે પ્રદેશે રામં પુરસ્કૃત્ય શિવં સ્તુવન્તિ ।
ઐક્યં પ્રદિષ્ટં શિવરામયોશ્ચ વિષ્ણ્વીશમૂર્તે  તવ સુપ્રભાતમ્ ॥ ૮॥

બ્રહ્મેન્દ્ર-વિષ્ણુ-ગુહ-વાક્પતિ-સોમસૂર્યાઃ મૃત્યુઞ્જયાદિ-ચરિતં બહુધા સ્તુવન્તિ ।
વાચસ્પતિર્વદતિ વાસરશુદ્ધિમારાત્ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૯॥

દુષ્પ્પણ્યજાત-શિશુમારણવારકં ચ યત્પાવકાખ્યમતિપાવનમગ્નિતીર્થમ્ ।
આવાતિ મન્દમનિલસ્સહ તસ્ય તોયૈઃ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીરામમન્ત્ર-જપપાવન-ચિત્તવૃત્તિઃ આપાદવક્ત્રમનુલેપિત-રક્તવર્ણઃ ।
શ્રીમારુતિર્જયતિ મન્દિર-પૂર્વભાગે શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૧॥

સીતાપહર્તૃ-દશકણ્ઠ-વિમર્દનાય દેવાંશભૂત-હરિયૂથ-સહાયકેન ।
રામેણ બદ્ધ-વરસેતુતલ-પ્રસન્ન શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૨॥

બ્રહ્મઘ્ન-પાપ-પરિહારવિધૌ યતેન રામેણ પૂજિત-પવિત્ર-પદાબ્જ-યુગ્મ ।
ભક્તાર્તિ-ભઞ્જન નિરઞ્જન રામનાથ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૩॥

શૈલાધિરાજ-તનયાઞ્ચિઅત-વામભાગ કૈલાસવાસ કરુણામૃત-પૂર્ણ-નેત્ર ।
ગંગાધર ત્રિનયનાઙ્કિત ચન્દ્રચૂડ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૪॥

નિત્યાભિષેચન-વિધૌ તવ ગાઙ્ગ-તોયં યેન પ્રદિષ્ટમિહ રાવણ-ઘાતકેન ।
તત્કોટિ-તીર્થ-મહિમાવૃત-સન્નિધાન શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૫॥

શેષેણ વાયુકૃત-વિક્રમ-વાદ-યુદ્ધે વાતેન ભેદિતમભૂત્ કિલ પર્વતાગ્રમ્ ।
તદ્ગન્ધમાદન-ગિરૌ કૃત-સન્નિધાનં શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૬॥

ગઙ્ગાનદી-તટ-વરાલ-પુણ્યભૂમૌ બ્રહ્માદિ-દેવ-નિકરૈઃ સ્તુત-વિશ્વનાથઃ ।
ત્વદ્વામભાગ-પરિકલ્પિત-મન્દિરસ્થઃ શ્રીગન્ધમાદનવિભો તવ સુપ્રભાતમ્ ॥ ૧૭॥

પૂર્ણેન્દુ-બિંબ-વદનસ્સરસીરુહાક્ષઃ કોદણ્ડ-મણ્ડિત-કરઃ કરુણા-સમુદ્રઃ ।
સીતાપતિર્જયતિ સુન્દર તે સમક્ષં શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૧૮॥

નન્દીશ્વરેણ ગજવક્ત્ર-ષડાનનાદ્યૈઃ દેવૈરનન્ત-વરદૈશ્ચ નવગ્રહાદ્યૈઃ ।
ભક્ત્યા સમર્ચિત-નિજામ્બુજ-પાદ-યુગ્મ શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૧૯॥

પદ્માલયાપતિ-વિધીન્દ્ર-કિરીટ-રત્નૈઃ નીરાજિતાઙ્ઘ્રિ-યુગલા ગિરિરાજ-પુત્રી ।
ત્વદ્દક્ષિણાલયવરે કૃત-સન્નિધાના શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૨૦॥

લક્ષ્મીસરઃ-પ્રભૃતિ પાપ-હરાણિ સન્તિ તીર્થાનિ પુણ્ય-ફલદાનિ તવાલયાન્તે ।
તત્તીર્થ-દિવ્ય-મહિમાવૃત-પુણ્ય-દેશ શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૨૧॥

શ્રીરામલિઙ્ગ કરુણામૃત-પૂર્ણ-નેત્ર શ્રીભૂમિનાથ-પરિસેવિત-દિવ્યગાત્ર ।
શ્રીપાર્વતીશ ભવતાપ-વિનાશ-દક્ષ શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૨૨॥

જ્યોતિઃ-સ્વરૂપ તવ દિવ્ય-પદામ્બુજે મે નિર્વ્યાજ-ભક્તિમિહ દેહિ કૃપામ્બુરાશે ।
માં પાહિ દેવ શરણાગત-પારિજાત શ્રીરામનાથ શિવ ભો તવ સુપ્રભાતમ્ ॥ ૨૩॥

॥ ઇતિ શ્રીરામનાથ સુપ્રભાતમ્॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in

*shrI rAmanAtha-suprabhAtam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*